# शिवस्तुतिः
# (श्री मल्लिकुचिसूरिसूनुनारयण पण्डिताचार्य विरचिता)

## Shiva Stutih
## (Shri Mallikuchisoorisoonu Narayana Panditaachaarya Virachita)

---

शिवस्तुतिः ।
(श्री मल्लिकुचिसूरिसूनु नारयण पण्डिताचार्य विरचिता)

स्फुटं स्फटिकसप्रभं स्फुटितहारकश्रीजटं शशाङ्कदलशेखरं कपिलफुल्लनेत्रत्रयम् ।
तरक्षुवरकृत्तिमद्भुजगभूषणं भूतिमत्कदा नु शितिकण्ठ ते वपुरवेक्षते वीक्षणम् ॥१॥

त्रिलोचन विलोचने लसति ते ललामायिते स्मरो नियमघस्मरो नियमिनामभूद्भस्मसात् ।
स्वभक्तिलतया वशीकृतवती सतीयं सती स्वभक्तवशतो भवानपि वशी प्रसीद प्रभो ॥२॥

महेश महितोऽसि तत्पुरुषपूरुषाग्र्यो भवानघोररिपुघोर तेऽनवम वामदेवाञ्जलिः ।
नमः सपदिजात ते त्वमिति पञ्चरूपोचितप्रपञ्चचयपञ्चवृन्मम मनस्तमस्ताडय ॥३॥

रसाघनरसानलानिलवियद्विवस्वद्विधुप्रयष्टृषु निविष्टमित्यज भजामि मूर्त्यष्टकम् ।
प्रशान्तमुत भीषणं भुवनमोहनं चेत्यहो वपूंषि गुणभूषितेऽहमहमात्ममोहम्भिदे ॥४॥

विमुक्तिपरमाध्वनां तव षडध्वनामास्पदं पदं निगमवेदिनो जगति वामदेवादयः ।
कथञ्चिदुपशिक्षिता भगवतैव संविद्रते वयं तु विरलान्तराः कथमुमेश तन्मन्महे ॥५॥

कठोरितकुठारया ललितशूलया वाहया रणड्डमरुणा स्फुद्धरिणया सखट्वाङ्गया ।
चलाभिरचलाभिरप्यगणिताभिरुन्नत्यतश्चतुर्दश जगन्ति ते जय जयेत्ययुर्विस्मयम् ॥६॥

पुरा त्रिपुररन्धनं विविधदैत्यविध्वंसनं पराक्रमपरंपरा अपि परा न ते विस्मयः ।
अमर्षिबलहर्षितक्षुभितवृत्तनेत्रोज्ज्वलज्ज्वलनहेलया शलभितं हि लोकत्रयम् ॥७॥

सहस्रनयनो गुहः सहसहस्ररश्मिर्विधुर्बृहस्पतिरुताप्पतिः ससुरसिद्धविद्याधराः ।
भवत्पदपरायणाः श्रियमिमां ययुः प्रार्थितां भवान् सुरतरुर्भृशं शिव शिव शिवावल्लभ ॥८॥

तव प्रियतमादतिप्रियतम सदैवान्तरं पयस्युपहितं घृतं स्वयमिव श्रियो वल्लभम् ।
विबुध्य लघुबुद्धयः स्वपरपक्षलक्ष्यायितं पठन्ति हि लुठन्ति ते शठहृदः शुचा शुण्ठिताः ॥९॥

निवासनिलया चिता तव शिरस्ततेर्मालिका कपालमपि ते करे त्वमशिवोऽस्यनन्तर्धियाम् ।

तथापि भवतः पदं शिवशिवेत्यदो जल्पतामकिञ्चन न किञ्चन वृजिनमस्ति भस्मीभवेत् ॥१०॥

त्वमेव किल कामधुक् सकलकाममापूरयन् सदा त्रिनयनो भवान् वहति चार्चि नेत्रोद्भवम् ।
विषं विषधरान्दधत्पिबसि तेन चानन्दवान्विरुद्धचरितोचिता जगदधीश ते भिक्षुता ॥११॥

नमः शिवशिवाशिवाशिवार्थकृन्ताशिवं नमो हरहराहराहर हरान्तरीं मे दृशम् ।
नमो भव भवाभवप्रभवभूतये मे भवान्नमो मृड नमो नमो नम उमेश तुभ्यं नमः ॥१२॥

सतां श्रवणपद्धतिं सरतु सन्नतोक्तेत्यसौ शिवस्य करुणङ्कुरात्प्रतिकृतात्सदा सोचिता ।
इति प्रथितमानसो व्यधित नाम नारायणः शिवस्तुतिमिमां शिवं लिकुचिसूरिसूनुः सुधीः ॥१३॥

इति श्रीमल्लिकुचिसूरिसूनुनारयणपण्डिताचार्यविरचिता शिवस्तुतिः संपूर्णा॥

**www.shaivam.org**